दीर्घकेशः, पुं, (दीर्घाः केशा इव लोमान्यस्य ।) भल्लूकः । इति राजनिर्घण्टः ॥ (देशभेदः । यथा, बृहत्संहितायाम् । १४ । २३ ।
"एकविलोचनशूलिकदीर्घग्रीवास्यकेशाश्च ॥"
दीर्घाः केशा यस्य ।) आयतकचे, त्रि ॥ (स्त्रियां वा ङीष् स्वाङ्गत्वात् । यथा, महानाटके ।१६१।
"बिम्बोष्ठी चारुनेत्रा गजपतिगमना दीर्घकेशी सुमध्या ॥")

दीर्घकोशिका, स्त्री, (दीर्घः कोशो यस्याः । ततः संज्ञायां कन् टाप् अत इत्वञ्च ।) दीर्घकोषिका । इत्यमरटीकायां भरतः ॥

दीर्घकोषिका, स्त्री, (दीर्घः कोषोऽस्याः । कापि अत इत्वम् ।) झिणायिका । झिणुक् इति ख्याता । तत्पर्य्यायः । दुर्नामा २ । इत्यमरः । १ । १० । २५ ॥

दीर्घगतिः, पुं, (दीर्घा आयतस्थानग्राहा गतिः पादविक्षेपो यस्य ।) उष्ट्रः । इति राजनिर्घण्टः ॥

दीर्घग्रन्थिः, पुं, (दीर्घो ग्रन्थिः पर्व्वास्य ।) गजपिप्पली । इति राजनिर्घण्टः ॥ (विवृतिरस्य गजपिप्पलीशब्दे विज्ञेया ॥)

दीर्घग्रीवः, पुं, (दीर्घा ग्रीवास्य ।) उष्ट्रः । इति हेमचन्द्रः ।४।३२६॥ नीलक्रौञ्चः । इति राजनिर्घण्टः ॥ (देशभेदः । यथा, बृहत्संहितायाम् । १४ । २३ ।
"एकविलोचनशूलिकदीर्घग्रीवास्यकेशाश्च ॥")

दीर्घघाटिकः, पुं, (दीर्घा घाटास्यास्तीति । ठन् ।) उष्ट्रः । इति शब्दरत्नावली ॥

दीर्घजङ्गलः, पुं, (दीर्घं यथा तथा जङ्गलो गतिशीलः ।) भङ्गानमत्स्यः । इति शब्दमाला ॥

दीर्घजङ्घः, पुं, (दीर्घा जङ्घास्य ।) वकः । इति त्रिकाण्डशेषः ॥ उष्ट्रः । इति जटाधरः ॥ आयतजानुयुक्ते, त्रि ॥

दीर्घजिह्वः, पुं, (दीर्घा जिह्वा यस्य ।) सर्पः । इति हेमचन्द्रः । ४ । ३६६ ॥ (दानवविशेषः । यथा, महाभारते । १ । ६५ । ३० ।
"गरिष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः ॥"
स्त्रियां टाप् । राक्षसीविशेषः । यथा, महाभारते । ३ । २८६ । ४४ ।
"ह्रग्वीं च्रग्वीं ललाटाक्षीं दीर्घजिह्वामजिह्विकाम् ॥")

दीर्घतरुः, पुं, (दीर्घश्चासौ तरुश्चेति कर्म्मधारयः।) तालः । इति शब्दार्थकल्पतरुः ॥

दीर्घतिमिषा, स्त्री, (दीर्घस्तिमिषः । अभिधानात् स्त्रीत्वम् ।) कर्कटी । इति शब्दमाला ॥

दीर्घतुण्डा, स्त्री, (दीर्घं तुण्डं यस्याः ।) छुछुन्दरी । इति कोषान्तरम् ॥

दीर्घतृणः, पुं, (दीर्घं तृणमिति नित्यकर्म्मधारयः । अभिधानात् पुंस्त्वम् ।) पल्लिवाहः । इति राजनिर्घण्टः ॥

दीर्घदण्डः, पुं, (दीर्घो दण्ड इव काण्डावच्छेदेन ।) एरण्डवृक्षः । इति भावप्रकाशः ॥

दीर्घदण्डकः, पुं, (दीर्घदण्ड + स्वार्थे कन् ।) एरण्डवृक्षः । इति जटाधरः ॥

दीर्घदण्डी, स्त्री, (दीर्घदण्ड + गौरादित्वात् ङीष् ।) गोरक्षी । इति राजनिर्घण्टः ॥

दीर्घदर्शी, [न्] पुं, (दीर्घं दीर्घात् वा पश्यतीति । णिनिः ।) पण्डितः । इत्यमरः । २ । ७ । ६ ॥ गृध्रः । इति शब्दरत्नावली ॥ भल्लूकः । इति राजनिर्घण्टः ॥ दूरदर्शके, त्रि ॥ (यथा, महाभारते । २ । ४८ । ४३ ।
"स हि धर्म्मं पुरस्कृत्य दीर्घदर्शी परं हितम् ॥")

दीर्घदृष्टिः, पुं, (दीर्घा दृष्टिर्दर्शनमस्य ।) दीर्घदर्शी । इति हलायुधः ॥

दीर्घद्रुः, पुं, (दीर्घश्चासौ द्रुश्चेति कर्म्मधारयः ।) तालवृक्षः । इति शब्दचन्द्रिका ॥

दीर्घद्रुमः, पुं, (दीर्घो द्रुम इति नित्यकर्म्मधारयः ।) शाल्मलिः । इति राजनिर्घण्टः ॥

दीर्घनादः, पुं, (दीर्घो दूरगो नादोऽस्य ।) शङ्खः । इति राजनिर्घण्टः ॥

दीर्घनालं, क्ली, (दीर्घं नालमस्य ।) दीर्घरोहिषकम् । इति राजनिर्घण्टः ॥

दीर्घनालः, पुं, (दीर्घं नालं यस्य ।) वृत्तगुण्डः । यावनालः । इति राजनिर्घण्टः ॥

दीर्घनिद्रा, स्त्री, (दीर्घा निद्रेति नित्यकर्म्मधारयः ।) मृत्युः । इति हेमचन्द्रः । २ । २३८ ॥ (यथा, मार्कण्डेये । ७ । १३ ।
"सोऽद्य मत्कार्मुकाक्षेपविदीपितदिगन्तरैः ।
शरैर्विभिन्नसर्व्वाङ्गो दीर्घनिद्रां प्रवेक्ष्यति ॥")

दीर्घपटोलिका, स्त्री, (दीर्घा पटोलिका ।) लताफलविशेषः । धुँदुल इति भाषा । अस्य गुणाः । स्निग्धत्वम् । कटुत्वम् । विष्टम्भित्वम् । गुरुत्वम् । वायुपित्तश्लेष्मरुचिभेदकारित्वम् । मधुरत्वम् । शीतलत्वञ्च । इति राजवल्लभः ॥

दीर्घपत्रः, पुं, (दीर्घं पत्रमस्य ।) राजपलाण्डुः । विष्णुकन्दः । हरिदर्भः । कुन्दरः । तालः । इति राजनिर्घण्टः ॥ कुपीलुः । इति भावप्रकाशः ॥ (इक्षुभेदः । यथा, सुश्रुते सूत्रस्थाने ४५ अः ।
"कान्तारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः ।
नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोषकृत् ॥")

दीर्घपत्रकः, पुं, (दीर्घपत्र + संज्ञायां कन् ।) रक्तलशुनः । एरण्डः । हिज्जलः । वेतसः । इति राजनिर्घण्टः ॥ करीरवृक्षः । इति शब्दचन्द्रिका ॥ जलजमधूकः । इति जटाधरः ॥ लशुनः । इति हेमचन्द्रः । ४ । २५३ ॥ (इक्षुभेदः । यथा, सुश्रुते सूत्रस्थाने ४५ अः ।
"सूचिपत्रो नीलपोरो नैपालो दीर्घपत्रकः ।
वातलाः कफपित्तघ्नाः सकषाया विदाहिनः ॥")

दीर्घपत्रा, स्त्री, (दीर्घपत्र + टाप् ।) चित्रपर्णिका । चाकुलियाभेदः । (यथा, भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।
"शालिपर्णी स्थिरा सौम्या त्रिपर्णी पीवरी गुहा ।
विदारिगन्धा दीर्घाङ्गी दीर्घपत्रांशुमत्यपि ॥")
क्षुद्रजम्बुः । इति रत्नमाला ॥ गन्धपत्रा । केतकी । डोड़ीक्षुपः । इति राजनिर्घण्टः ॥ (चिक्षापरपर्य्याय उद्भिद्भेदः । यथा, भावप्रकाशे पूर्ब्बखण्डे प्रथमे भागे ।
"चिञ्चा चञ्चुश्चञ्चुकी च दीर्घपत्रा सतिक्तका ॥")

दीर्घपत्रिका, स्त्री, (दीर्घपत्र + संज्ञायां कन् टाप् अत इत्वञ्च ।) श्वेतवचा । घृतकुमारी । शालपर्णी । इति राजनिर्घण्टः ॥

दीर्घपत्री, स्त्री, (दीर्घपत्र + गौरादित्वात् ङीष् ।) पलाशीलता । महाचञ्चुशाकः । इति राजनिर्घण्टः ॥

दीर्घपर्णी, स्त्री, (दीर्घं पर्णमस्याः । गौरादित्वात् ङीष् ।) पृश्निपर्णी । इति राजनिर्घण्टः ॥ (पृश्निपर्णीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

दीर्घपल्लवः, पुं, (दीर्घः पल्लवो यस्य ।) शणवृक्षः । इति राजनिर्घण्टः । आयतच्छदे, क्ली । तद्वति, त्रि ॥

दीर्घपात्, पुं, (दीर्घौ पादावस्य । समासे अन्त्यलोपः ।) कङ्कपक्षी । इति शब्दरत्नावली ॥

दीर्घपादः, पुं, (दीर्घौ पादौ यस्य । समासान्तविधेरनित्यत्वात् अन्त्यलोपाभावश्च ।) कङ्कपक्षी । इति हेमचन्द्रः । ४ । ४०० ॥

दीर्घपादपः, पुं, (दीर्घश्चासौ पादपश्चेति नित्यकर्म्मधारयः ।) तालः । पूगः । इति राजनिर्घण्टः ॥

दीर्घपृष्ठः, पुं, (दीर्घं पृष्ठं यस्य ।) सर्पः । इत्यमरः । १ । ८ । ८ ॥

दीर्घफलः, पुं, (दीर्घं फलं यस्य ।) आरग्वधवृक्षः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"आरग्वधो राजवृक्षः सम्याकश्चतुरङ्गुलः ।
आरेवतो व्याधिघातः कृतमालः सुवर्णकः ॥
कर्णिकारो दीर्घफलः स्वर्णाङ्गः स्वर्णभूषणः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

दीर्घफलकः, पुं, (दीर्घफल + संज्ञायां कन् ।) अगस्त्यवृक्षः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्या-गस्त्यशब्दे व्याख्याताः ॥)

दीर्घफला, स्त्री, (दीर्घाणि फलानि यस्याः ।) कपिलद्राक्षा । जतुका । इति राजनिर्घण्टः ॥

दीर्घबाला, स्त्री, (दीर्घः बालो यस्याः ।) चमरी । इति राजनिर्घण्टः ॥

दीर्घमारुतः, पुं, (दीर्घः अधिकसमयव्यापी मारुतो निःश्वासवायुर्यस्य ।) हस्ती । इति त्रिकाण्डशेषः ॥

दीर्घमूलं, क्ली, (दीर्घं मूलं यस्य ।) लामज्जकम् । इति राजनिर्घण्टः ॥

दीर्घमूलः, पुं, (दीर्घं मूलं यस्य ।) मोरटलता । बिल्वान्तरवृक्षः । इति राजनिर्घण्टः ॥

दीर्घमूलकं, क्ली, (दीर्घमूल + संज्ञायां कन् ।) मूलकम् । इति राजनिर्घण्टः ॥

दीर्घमूला, स्त्री, (दीर्घं मूलं यस्याः । टाप् ।) श्यामालता । शालपर्णी । इति रत्नमाला ॥ (यथा, सुश्रुते । १ । ३८ ।
"प्रियङ्गु समङ्गधातकी पुन्नागरक्तचन्दनकुचन्दन-